# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** | **प्रश्नपत्रम् – 6** | गुणाः –70

विषयः – पुराणेतिहासः | **कोड –C.C.2.4.8** | समयः – 3:00 तः 6:00

दिनाङ्कः –04/04/2019 | सन्दर्भग्रन्थः – महाभारते शान्तिपर्वान्तर्गतमोक्षधर्मः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) यथा काष्टं च काष्टं च समेयातां महोदधौ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥

(2) ईहा धनस्य न सुखा लब्ध्वा चिन्ता च भूयसी।
लब्धनाशे यता मृत्युर्लब्धं भवति वा न वा॥

(3) मनुष्ययोनिमिच्छन्ति सर्वभूतानि सर्वशः।
मनुष्यत्वे च विप्रत्वं सर्व एवाभिनन्दति॥

**प्रश्नः-2 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) स्वकल्याणमिच्छतः पुंसः कर्तव्यं ज्ञानोपदेशश्च।

(2) शुभाशुभकर्मणां परिणामः।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) चित्तस्य हि प्रसादेन हित्वा कर्म शुभाशुभम्।
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमनानन्त्यमश्नुते॥

(2) शारीरैर्मानसैर्दुःखैः सुखैश्चाप्यसुखोदयैः।
लोकसृष्टिं प्रपश्यन्तो न मुह्यन्ति विचक्षणाः॥

(3) आपोऽग्निर्मारुतश्चैव नित्यं जाग्रति देहिषु।
मूलमेते शरीरस्य व्याव्य प्राणानिह स्थिताः॥

**प्रश्नः-4 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) पञ्चमहाभूतानां गुणानां समीक्षा कर्तव्या।

(2) सत्यस्य महिमानं वर्णयित्वा असत्यदोषसारं दर्शयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि।
गच्छन्ति योगिनो ह्येवं निर्वाणं तन्निरामयम्॥

(2) विषयेषु तु संसर्गाच्छाश्वतस्य तु संश्रयात्।
मनसा चान्यथा कांक्षन् परं न प्रतिपद्यते॥

(3) धर्मादुत्कृष्यते श्रेयस्तथाश्रेयोऽप्यधर्मतः।
रागवान् प्रकृतिं ह्येति विरक्तो ज्ञानवान् भवेत्॥

**प्रश्नः-6 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) जपयज्ञसन्दर्भे युधिष्ठिरस्य प्रश्नः तदुत्तरे जप-ध्यानयोः महिमा।
(2) ज्ञानप्रशंसां विलिख्य परमात्मतत्त्वं निरूपयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) नरः केन सुखं लभते?
(2) बोध्यस्य कति गुरवः?
(3) कः जीवः अङ्गानि संहरते?
(4) कस्य प्रश्नसन्दर्भे बोध्यगीता प्रोक्ता?
(5) आशामनाशां कृत्वा कः सुखं स्वपिति?
(6) परमं सुखं किम्?
(7) सकलान् लोकान् कः सृजते?
(8) लोहितः वर्णः कस्य प्रोक्तः?
(9) ब्राह्मणानां कति कर्माणि?
(10) अनृतम् – इत्युक्ते किम्?
(11) लोकः केन धार्यते?
(12) चन्द्रं कः ग्रसते?
(13) भीष्मः राजधर्मोपदेशं कस्मै ददाति?
(14) महाभारते कति पर्वाणि?
(15) मोक्षधर्मपर्व कस्मिन् पर्वणि समायाति?